षभूतोऽवाक्य एवेति संबंधः। पदार्थ इति। वाक्यार्थविशेष इति शेषः। तत्र हेतुः। पतिरभूतस्य विध्यादेरिति संबंधः। ति
धिस्तदंतिफमेवगतासीत्यादिः। वाक्यार्थोपि वाक्यार्थविशेषः। यद्व्यज्यत इति। तथा च शब्दश्रवणानंतरं यावानर्थः प्र
[illegible] शक्तिरेवेत्यर्थः। तन्निराकरोतीति। तत्रेति। ननु ज्ञातमेव ज्ञापक

एवमावापोद्वापक्रमेण परपदार्थान्वित तदर्थ एव पदादीनां शक्तिरुपजीव्यशक्त्यनुरोधादित्याह परत इति ५

मस्ति स्तत आह ज्ञातव्यं चेति। अन्यथातिप्रसंगादिति भावः। सचेति। संकेत इत्यर्थः। यत्पर इति। यत्र तात्पर्यं स शब्दा
र्थ इत्यर्थः। उपदिश्यते प्रयुज्यत इत्यर्थः। ननु वाक्यस्य पदानुपस्थाप्यते पितात्पर्य भवत्येव विषं भुंक्ष्वेत्यादिवा
क्यस्य नास्य गृहे भोक्तव्यमित्यत्र तात्पर्यादिति मतं शंकते। यात्विति। स एवेति। एतद्गृहभोजनाभाव एवेत्यर्थः।
वाक्यार्थो वाक्य तात्पर्य विषयः ननु शब्दार्थः स इति भावः। निराकरोति तत्रेति। अन्यथाभावे तिचकारचे
यर्थ्यादिति भावः। अंगांगि भावः साक्षादिति दोषः। गुणानां च परार्थत्वादिति न्यायात्। विषभक्षणादपी
ति। एवं च शब्दार्थ एव स इति तत्र तात्पर्यमविरुद्धमिति भावः। तथा च यत्परः शब्दः स शब्दार्थ इति निरस्तं। यदि चेति।
कथं न वाच्यत्वमित्यन्वयः। ननु तद्वाक्यप्रतिपाद्यत्वमभिधानेन शोकादीनां तथात्वमतो दोषांतरमाह कस्माच्चेति।
ननु मास्तु कुत इत्यत आह किमितिचेति। तथा च सूत्रविरोध इति भावः। यदि वस्तुगतापदार्थांतरे व्यांजितोभि
धेयस्तदा वस्तुव्यंजना अन्यथा रुचिं कुरु इत्यादिपदं दुष्टं न स्यात् दुष्टहेतोरसभ्यार्थोपस्थितेस्तत्राभावात्। तदर्थ
२ स्यानन्वितत्वादिति वाह किंच कुरु चिमित्यादीनन्वितानित्यदोषव्यविभागोऽनुपपन्न एवेत्यत आह नचानुपपन्न
मिति। ननु व्यंजनापक्षेपि तदनुपपन्नमेवेत्यत आह वाच्यवाचकभावेति। इतो पि व्यंजना सिद्धिरित्याह द्वयमिति॥ त
वाचकत्वेऽन्यो स्तु व्येपि कपालि पदेन जुगुप्साव्यंजनाद्देव्या अपि दग्ध्वा व्यक्तौ दोषत्वतो पपत्तिरिति युक्तमनुगुणता
त्वमिति भावः। निषेधविध्यात्मनेति। वैधर्म्यमिति सर्वत्र दोषः। शांतेति। अन्यतरगतत्वेनान्यतरनिश्चयो व्यंग्यः
संदेहो वाच्यः ते न रूपेणेत्यर्थः। कथमवनिपेति। दर्पो गर्वः। विदितांश्रीः ख्यातता तत्कुतो गर्व इत्यन्वयः। इत्तमं छेद
नं। निहतारेरपीत्यनेन शत्रोढत्वमुक्तं। असौ कीर्तिरिति संबंधः। अपगतांगेरित्यनेन शत्रोः सामर्थ्यमुक्तं। वस्तुभेदेन
न तदपहारस्यात्विदुः सहत्वमुक्तं एवं त्वया प्रौढेन तस्य श्रीरपहृता तेन दुर्वलेनापि तव वद्धभापह्नेति स एव श्रेया
निति व्यज्यते। एभिः शत्रुभिः। स्तुतीति। निंदा वाच्या प्रगल्भा तु स्तुतिस्त द्रूपेत्यर्थः। एवं स्वरूपभेदः। इत्यपेक्षाद्भावे
नेति। पूर्वं वाच्य प्रतीतिस्ततो व्यंग्य प्रतीतिरित्यर्थः। शब्देति। शब्दाश्रयत्वे वाच्य वाचकभावस्य शब्दैकदेशादिगतत्वं

व्यंग्यव्यंजकभावस्येत्यर्थः। शब्दानुशासनेनेति। अनुशासनेन वाच्यार्थस्य प्रतिभोतकत्वादिसहितेन व्यंग्यस्येत्यर्थः।
प्रतिभा वासना। बोधमात्रेति। बोधमात्रस्य प्रतीतिमात्रं पुनर्वाचकभावेन विदग्धस्य चमत्कारो व्यंजनयेत्यर्थः।
संख्यायादृति। वाचकत्वं व्यंग्यस्य नानात्वमित्यर्थः। कस्स येति। अधरखंडनं दृष्ट्वा कुपिते प्राणनाथे सख्या इयमु
५ क्तिः। वारितेति निषिद्धे वामादिपरीता वारिता। सहस्व पतिक्रोधं यत्र वाममनुभव। इदानीमुपपतिसंनिधौ। तत्संनिधौ सु
खजनकमासीदित्यर्थः। अत्र वाच्योऽर्थः भ्रमरेणास्या अधरः खंडितो नोपपतिनेत्यस्य कांतः। ममैवं वैदग्ध्यमित्यस्य प्र
तिवेशिनी। मयेदं समाहितं पुनरेवं न कार्यमित्यस्य सखीति विषयभेद इत्यर्थः। कारताभेद इति। कारतास्य कार्यधर्म
त्वं नेति न विरुद्धधर्मत्वमिति भावः। अपवित्तौ संकेतविषयापेक्षे इत्यर्थः। तत्रैवाभिधाप्रवृत्तेः बीजं याच्यापि तद्धेतु ना
त्वात्। शब्देति। शब्दानभिधेयत्वे तात्पर्यविषयत्वमेव प्रयोजकं। रामोऽस्मीति। बुं बुं राम एवात्र वक्ता बुद्धिस्थो भावेन सं
बोधनं। अत्र प्रत्याख्यानरूपेऽपि स्नादिपादत्रयी। प्रत्याख्यानरूपेः परिहारपरायणायां नरदत्तसाराय तेन। सोढं स्वीकृतं।
व्यापदेशविषयेरिति श्लोकार्थः। नियतसंबंधादिकं वानुपदं विवेचयिष्यति। कथं वा मुख्यार्थबाधं विना लक्षणेत्यता
ह अत एवेति। अत्र पथिकत्वेनानभिज्ञत्वं द्योत्यते। दिवसक इति निंदार्थकः। स चावयोः श्रेयः प्रतिबंधकत्वात्। अ
तएवेति। यद्वेति एकसंकेतसापेक्षाभिधा तद्बाधसापेक्षा लक्षणा तत एव परं परस्याजनकतापि संकेतसापेक्षेत्यभिधा
पुच्छभूते इत्यर्थः। विचरीएति। रसाकुला रसमग्ना। नियमनमाच्छादनं। अस्तामप्रयोजकत्वं। संकोचो मुद्रणं। स्वगतं नोपि
धानं। निर्यंत्रणा माध्यस्थ्यं। निराकरोतीति तैरपीति। अविचेति। अविधादशायामित्यर्थः। तैरपि व्यवहारे भइनयस्वीका
रादिति भावः। उक्तेति। निःशेषेत्यादावित्यर्थः। विध्यादिद्वारेति कमे च गतासीत्यादिरित्यर्थः। विधिरूपकनिषेधाभा
वः। एवं चेति। प्रतिबंधो व्याप्तिः। तथा च संबंधसत्वेऽपि न व्याप्तिं विना व्यंग्यव्यंजकभाव इत्यर्थः। पक्षधर्मतामाह धर्मिनिष्ठ
त्वेनेति। त्रिरूपादिति। पक्षसत्वसपक्षसत्वविपक्षासत्वरूपधर्मयुक्तादित्यर्थः। बाधाभावादेः साधारणत्वादन
भिधानं। अन्वयिव्यतिरेक्युभयव्यतिरेकिरूपत्रयमिति कश्चित्। तद्रूप इति। लिंगज्ञानमनुमानं यदुक्तं तेनानुमानेनानुमिता
रूपतद्दत्यनुमानरूपो व्यंग्यव्यंजकभाव इत्यन्वयः। अनुमानपदमेवानुमितिपरमन्यथा सामानाधिकरण्यासंभवात्॥
६

एवं चानुमानादेव व्यंग्यप्रतीतिरिति भावः। धार्मिकेति। सो ऽप्यसौ परश्रयो विघटकस्यात त्वात्। विश्रब्धो ऽभीतः।
ते नञी रूस्वभावत्वमुक्तं। सश्चेति यद्भयेन ग्रामभ्रमणादि हतमासीत् तं तेनेति प्रसिद्धिरुक्तेः सतो भयाभिध्यानोप
तद्द्दति लभ्यते। अत्र संकेति तं निकुंजं पुष्पावचयादिनिमित्तं संचरतो धार्मिकस्य निवारणतात्पर्यमविनयवतो द
पुष्यते। अन्येन चेति। निधिलोभादिनेत्यर्थः। न तु सामान्यत एव भ्रमणायोग्यत्वं न साध्यमपि तु वीरस्वभावस्य
तत्र साध्याभावव्याप्यत्वे न च विरोध इत्याह शुनोपि चिन्त्यपदपीति। स्वशादिशंकया अपौरुषेयत्वाद्देति शेषः।। एवं
व्यभिचरितो व्यतिरेकी विरुद्ध इति मतेनेदमुक्तमिति निरस्तं। विरोधेऽसाध्ये यथा भ्रमतस्येव समयन्यकाद्दा। एवंश्च न
रूपासिद्धिरपीत्याह गोदावरीतीर इति। वचनस्येति। हेथ्वलीप्रयुक्तस्येति शेषः। स्यादेतत्तरेपि व्यभिचार
माह निःशेषेति। नोपभोग एवेति। नोपभोगव्याख्यानीत्यर्थः। ननु व्यंजनापि कथमत आह व्यक्तिवादिनेति।
नच तत्राप्यधमत्वेन तदनुमानमत आह नचाधमत्वमिति। एवं चासिद्धिरपीति भावः।। नचेद्व्यक्तिपदेपि विशेष
इत्यत आह एवंविधादिति। तत्र व्याप्तेरनंगत्वेन संभावनाबलादेव तत्सिद्धिरिति भावः।। ।।इति काव्यकौस्तु
घां पंचमोद्योतः।। ।।एवं गुणीभूतव्यंग्येति दर्शिते चित्रभेदनिरूपणावसरः। तत्र यद्यपि शब्दचित्रार्थचित्ररूप
भेदद्वयं प्रथमोद्योते स एव दर्शितं तच्छब्दालंकारप्रदर्शनेनैव प्रदर्शितं भविष्यतीति न दर्शनीयं किंचिदस्ति
तथापि दर्शितमिति भेदद्वयमेव तावदनुपपन्नं शब्दार्थालंकारयोरन्योन्यनैरपेक्ष्येणानुपलंभात्। उपलंभे वा तृती
यभेदप्रसंगात् तदुपपादयति। शब्दार्थचित्रमिति। तथा चैकैकसत्त्वेन न विभागोऽपि तु प्राधान्यपुरस्कारेणेति प
रीत्या परत्वान्न वैयर्थ्यमिति भावः। ननु तथापि केचिच्छब्दालंकारमेव केचिदर्थालंकारमेव मन्यंते तन्मते स्वमत
मात्रे व्यविभाग इत्यत आह रूपकादिरिति। अर्थस्यापि विभावादिरूपध्वनिरसव्यंजकत्वेन तद्धर्म एवालंकार इति
भावः। रूपकादिमलंकारमिति। काव्यस्यालंकारो वाच्यः। का व्यंजकविभावः सुशब्द एवेति तद्धर्मत्वादेवालंका
र इति भावः। एकत्वमपि विशेषालंकारस्योपयोगितेति। शब्दधर्मत्वाच्छब्दालंकार इत्यर्थः। सोऽयं शब्दधर्मः शब्दाद

तासाच शाब्दधर्म इति भावः। शब्दाभिधेयेति। द्वयोरपि कविसंरंभगोचरत्वादिति भावः। कनकेति। कनकद्रवगौर
कः। विरहेत्यादिना पांडरत्वं सरसेत्यादिना वातिधावल्यं प्रकाश्यते। स्वभावोक्त्युपमयोः सत्वे प्राधान्या
च्छब्दचित्रत्वं कवेस्तत्रैव संरंभादिति दृष्टी। कुटिलतामिवेति सलोपमा तेन यथा कुटिलतां तथा कालताम
पि न त्यजंतीत्यर्थः। कुटिलतामपीति क्वचित्पाठः। श्लेषपरिचितेत्यर्थालंकारः सच्छद्मयोत्र प्रधानं। आसमाप्ति
कवेस्तत्रैव संरंभात्। अनुप्रासादेर्गुणीभूतत्वात्। नचात्र कथमर्थव्यंग्यत्वं रतिभावसत्त्वादत आह यद्यपीति
तथापीति। तात्पर्यमपि नेति भावः। एतत्काव्यदर्पणशब्दचित्रमर्थचित्रं च। ध्वनिप्रभेदवच्चित्रभेदानभिधाने वी
जमाह अत्रेति॥ ॥इति काव्यकौमुद्यां षष्ठोल्लासः॥ ॥काव्यस्य रूपमिति। धर्मितीति रूपिते दोषाभावादिवि
व शेषणानिरूपणावसरः। तेषु दोषाभावः प्रधानं सति दोषे गुणादेरकिंचित्करत्वात्। उक्तं च। साद्गुण्यः सुंदर
मपि श्चित्रे तौ केन दुर्भगमिति। सति दोषाभावे गुणादिकं विनापि चमत्कारः संभवति अपदोषतैव विगुणा
स्पगुणा इति न्यायात्। अतः प्रथमं तन्निरूपणादि प्रतियोगित्वेन दोषा निरूप्याः नच सामान्यज्ञानं विना वि
शेषजिज्ञासेति सामान्यलक्षणमाहेत्यर्थः। मुख्यार्थेति। मुख्यार्थस्य हतिर्यस्मादित्यर्थः। व्यधिकरणोपि व
स्क ॐ श्रीहर्षानुशासनात्। कंठेकाल इतिवत्। वसुस्थितौ। हतिशब्दः करणसाधनो दोषशब्दोप्येवं। मुख्यत्वं न शक्य
।त्वं किंतु प्रधानत्वमित्याह रसश्चेति। रसशब्देन भावादिरुच्यते। रस्यत इति कस्यचित्संभवात्। किंचासुखत्वं
।सुखत्वं रसस्य सुखस्वरूपत्वात् अपर्यत्वं शब्दप्रयोऽप्यत्र च विधेयत्वं तयोः कर्मधारयः। एवं रस एव पर्यवसा
।नादन्यपदार्थपदवैयर्थ्यात्। नच परस्परव्यभिचाराभावः। अन्यतरव्यभिचारस्यैव वक्तव्यत्वात्। बुधवर्द्धमान इति
यतः। अपकर्षश्च रसनिष्ठजातिविशेषः स एवापकर्षः। तारत्वमंदत्ववत्। भेदाभावेन संकरायोगात्। व्यंजक
वैचित्र्यापत्तिरिति चेन्न। यथा ज्ञानविशेषे पृथक्रूपेण कृतत्सत्वेनैकाधिकरणत्वाभावात्। केचित्तु मुख्या
येदं मुख्यार्थमिति यत्तु परसमासः। तच्च शब्दाद्यधुगलं तस्य हतिरन्यथात्वं येन रूपेणाव्यंजकत्वं तदभावः तद
नंतरमस्य सम्यगनवभासात्। लोके च दीपादिवैगुण्येन घटादेः सम्यगनवभासात्। तस्यैव वाचकपदेना
भिधानात्। तन्न। विशेषणसमासस्य लघुत्वेन लाघवोगात्।

नन्वेवं नीरसे दोषो न स्यादर्थाभिधायित्वाभावादित्यत आह रसाश्रयादिति। रसापकर्षत्वादित्यर्थः। नन्वेवं शब्दादि।
दोषाणां तत्त्वं न स्यादत आह उभयेति। ननु हतिर्नाशः स च रसादीनामनुपपन्न इत्यत आह हतिरपकर्ष इति। आदि
पदादिति। शब्दपदेन प्रतिपादकाभिधानं तेन पदवाक्ययोरेव ग्रहः। अन्यथा वर्णस्यापि शब्दपदादेव लाभे आ
दिपदेन तदुपादानविरोधादिति भावः। यद्यप्येकाक्षरको वा दोषः सर्वेषामेव वर्णानामपर्यवसितः तथापि यत्र
यत्पदं शास्त्रे तत्र तदेकदेशस्याशक्तत्वमिति समभिसंधाने नेतदुक्तं। अत्र केचित्। यत्र रसस्यानुसंधिः तत्र दो
षत्वं न स्यात् अपकर्षाभावादिति चेत्। न। उद्देश्यबुद्धिविघातस्यापकर्षपदार्थत्वात्। सा च रसवत्यपि विलंबि
ताचमत्कारिणी रसगोचरा नीरसे त्वविलंबिताचमत्कारिणी वाक्यार्थगोचरेति। विशिष्टविघातस्य सर्व
त्रापि दोषादित्यस्य स्पष्टतरता। ननु श्रुतिकटुत्वादीनां लक्षणपरत्वे विभागपरत्वाद् दुष्टस्यानुपस्थितेः कथं
लक्षणवाक्यार्थनिर्वाह इति चेत्। न। लक्षणतावच्छेदकस्यापि लक्षणतात्वे विरोधाभावात् पृथिवीत्वादिवत्।
श्रुतीति। श्रुतिकटुत्वं श्रुत्युद्वेगजनकतावच्छेदकधर्मवत्त्वं तच्च परुषवर्णवत्त्वमित्यर्थः। फलतो प्रधानस्य पुरुष
भेदे कालभेदादिना अनियतत्वात्। परुषत्वं चानियतनिःपाद्यत्वं। दुर्वचनत्वमिति यावत्। तदुक्तं कष्टमिति।
माधुर्यगुणव्यंजकत्वाद्वा। एवं बहूनां वर्णानां परुषत्वे पददोषत्वं कस्यचित्तथात्वे तदेकदेशदोषत्वमन्यथा भेदे
दासंभवात्। पदत्वप्रतिसंधिनिबंधनं पददोषत्वमिति केचित्। तन्न। प्रतिकूलवर्णत्वसंकरः। मधुराणाम
पि रौद्रादौ प्रतिकूलवर्णत्वसंभवात्। किं बहुना कोमलानां प्रतिकूलत्वेऽपि परुषत्वासंभवात्। अनंगेति।
अनंगस्यापि एकदीपकत्वेन भंगलग्नहत्वं। लोचनैरिति शेषः। तेन तरंगितेजाततरंगैः अनवच्छिन्ने इति यावत्।
२ ताद्दशापांगभंगिभिर्जिततरंगैरिति संबंधः। यद्वा तरंगितैरिति इत्थंभूतलक्षणे तृतीया तेनूतनं गीः। विशेष
तामेतत्। करणे तृतीयेत्यपुरुषोत्तमालिंगने तस्य करणत्वायोगात्। तरंगशब्दो दावानरेवाचिभूतेन तरंगायरणे
र्लक्षितयेति कश्चित्। लभत इति वर्तमानसामीप्ये लट्। अचिरेण लप्स्यत इत्यर्थः। सदेति पाठे सम्यक्। स्वायत्ते
शब्दप्रयोगे तादृशोपतापकशब्दप्रयोगेन श्रोतुरुद्वेजकताबीजं। प्रतिकूलवर्णता तदनियमात् वैयाकर

त्ता दौ च करिश्रोत्रि वा न दोषः। उद्वेगाभावात्। अत एवानित्यदोषत्वं। अनुकरणादन्येन कश्चिद्दोषस्येवानि
सदोषत्वात्। एतन्मे हेति। ८२ तदित्यपलापायोग्यं। मंदविपक मत्स्यविपर्कतेन वाडुरत्वलाभः। पुलिंद्रात्र
वरः। पल्लीपती सनेन तैत्रा लोचितं। कुंभस्याभूयमव्यापादनंत त्वाप्यतियाद्दीनमिति कर्टविशेषणं। वा
त्यमर्थमाह कुचयुगं पत्राहृतमिति। स्तनयोरनावृतत्वे तदासकस्यप्रहारपार्श्वनाभवतीति प्रार्थना। कुंजरकु
लें कर्ट। सर्दिभो नाथत इति। सर्दिरिक्षितत्यर्थः। आशीर्जिनाथ इति। सामान्यतस्तियादि प्राप्तो। सिद्धेसत्यारंभो
॥ नियमार्थ इति न्यायेन नाथतेराशिष्येवात्मनेपदनियमादाशिषि जिनाथ इत्यस्य बाधादित्यर्थः। ननु नाथ
त इति स्वरूपं संस्कृतममर्थविशेषमतथेत्यर्थदोषो साविति चेन्न। नाशस्य परिहृतसहत्वेनातत्वात्। अ
र्थानवगमश्चात्र दोषत्वबीजमत एवानित्यदोषत्वं। आम्नातमपीति। अनुशासनसिद्धमपीत्यर्थः। तेनासाधु
त्वमुच्छेदः। तेन यथा लुशिष्टं तथा प्रयोगाभावः। अन्यथातिप्रसंगात्। अनादृतमप्रयुक्तमित्यर्थः। ननु द्वित्रैः
कविभिरनादरसत्त्वे व्याप्तिप्रसंग इति चेन्न। बहुपाठानादृतिप्रसंगभंगात्। अलंकारत्वकरत्वात्प्रयो
गनिषेधस्तत्र मिति केचित्। यथायमिति। दारुणावारः कुरकमीपदार्थोपस्थितिविलंबश्च दूषकताबीजं। वस्तु
तः कविसमयचिलं घनश्रयो जनात्तु संधानेन मुख्यार्थविच्छेद इति तत्त्वं। एतस्य यमकादावदोषत्वादनित्य
दोषत्वं। तत्रोदृढालंकारसंभवेनाविलंबस्यानुदयत्वात्। घनदर्थपठितइति। तदर्थपठितमपि प्रकृते। विवक्षि
तार्थसामर्थ्यरहितमित्यर्थः। पदांतरोपसंदानेन सामर्थ्यात्। असमर्थमित्यज्यार्थतत्र स्तत्रैवपर्यवसानात्॥
हंतीति। धातोर्गसमर्थत्वेपि पदस्यादिशाद्वपदांतरायोगेन वतदुपस्थापकत्वादसमर्थमित्यर्थः। मुख्यार्था
नुपस्थितिर्दूषकताबीजमत एवानित्यदोषत्वं। उज्वलीकृतत्वमुज्जंतानीतत्वं। तिरोधानेन विलंबेनोपस्थाने
दूषकताबीजं। विवक्षितस्य विलंबेनोपस्थितिः। अस्य यमकास्ववदोषत्वादनित्यदोषत्वं। अनुचितार्थमिति। वि
वक्षिततिरस्कारको र्थो यस्य तदित्यर्थः। तपस्विभिरिति। सत्रितो याशिकाः। पशुतामुपागता हता इत्यर्थः। अश्वमे
धे पशावपश्चहन्यंते। पशुपदमिति। मयातराम त्वमिति वदुपमानाभावादिति भावः। न च विरुद्धमतिकारित्वं। तस्य पदांत
रसापेक्षस्यतत्वात्। विवक्षिततिरस्कारकोपलक्षित इति कचनीचं। निवहवतामिदां उक्तेति। परागोरजः। आ

प्रयोजनानुसंधानमत्र त्वं वा २ अत्रेति। जायतइति जंतुरिति योगदशायामपि अदातत्वेनावाचकमित्यर्थः। ६
संभ्रमं वनिशावकोरोति चार्दीनामिति। गौरत्वसमानाधिकरणसौरभेतात पद्मिनीत्वं व्यंग्यं। सहृदयवैरस्यं दूषकताबीजं।
अभिलषदो बोध्यं। ननु चार्दीनाम पदत्वात्कथं पददोषत्वमिति वाच्यं। समय इत्येवकुट्टत्वात्। तेषामपि पदत्वमिति
ति केचित्। अवाचकमिति। विवक्षितधर्मविशिष्टस्य धर्मिणोऽनवाचकमित्यर्थः। संकेतस्य स्वरूपसंबंधस्य
तत्राभावात्। अत एवासमर्थभेदः तस्य क्वचिच्छक्तिस्वीकारात्। तच्च क्वचिद्धर्मितो दशायामपि विवक्षितप्र
कारशक्तिविरहात् क्वचित्प्रकारदशायामपि धर्मिणि तदभावात्। क्वचिदुभयदशास्वभावात्। तत्राद्योदाहर
णमवंध्येति। विद्विषादरदर्शनत्राकारप्रश्ने सध्वं अत्रादिनमितीति। अत्र वियोगवेदनाविकलमनस्कतया नाम
सीलनेन तमोमयत्वे विवक्षिते तद्वैपरीत्यपरत्वेनादिनपदं प्रयुक्तं कालविशेषरूपावस्थायामपि प्रकाशमयत्वे
नतद्वाचकं दिनपदेनेत्यर्थः। पद्येति। उपसर्गविशेषेन धर्मधर्मितोरुभयोरप्यनुपस्थापकमित्यर्थः। विदधदि
ति। विशेषेण दधदित्यर्थः। दूषकताबीजमर्थानुपस्थितिः। नितबद्दो बोध्यं। त्रिधाश्लीलमिति। अश्लीलस्याकी
त्यर्थेसिध्मादित्वात् लच् प्रत्ययः। कपिलकादित्वाद्विकल्पः। एवं च कीर्तिशून्यत्वं तदर्थः। तद्वातिप्रसंगे
कमिति। व्रीडाद्यन्यतमव्यक्तिहेतुकत्वं तद्विशेषो बोध्यः। नचैतत्त्रयेणातिप्रसक्तम् तुगतं रूपमस्तीति व्रीडाद्यं
न्यतमहेतुकाकीर्तिमत्त्वे नानार्थोपमश्लीलशब्दइत्यर्थः। अन्यतमत्वमेव विभाजकमिति केचित्। तत्र व्रीडा
व्यंजकमुदाहरति साधनमिति। जुगुप्साव्यंजकमुदाहरति लीलेति। अनुनायकेनननिमूलेनेति विनेत्युं विते
ति संबंधः। अन्यासपत्नीति केचित्। मुग्धासुंदरी। भ्रांत्येति न विमर्ततरेणासुंवने हेतुनिर्देशः। तत्र भ्रांतिमुग्धा
धानेत्र दूषितत्वज्ञानं। धूर्ततानायकस्य स्फुटैवा। अतेशब्दयोगे विद्वितीया तम्हते परमात्मानमितिवत्। अप्रग
ल्भप्रकाशकमुदाहरति। मृदुपवनेति। वर्हदलपपाठः। पिच्छवर्हेनेर्दुसकृदलनुशासनविरोधात्। एवंविति
उदाहरणोच्चितमर्थः। यद्यपि नाशपदममंगलार्थकमेव न तु व्यंजकं तथाप्यमंगलत्वमपि न शक्यमिति भावः।।
चरक्तो विनाशपदेनास्तत्वं विवक्षितमत्रे तदभिधानाद् नाशस्मारकत्वेनामंगलत्वमितिवत्। अत एव न चिरु
द्रुमति। कारित्वं तत्र शस्त्रौ वदि [illegible] भवात्। वस्तुतोऽत्र विरुद्धस्यापरिहार्यत्वात्तत्त्वमेवेति

तत्त्वं। तादृशार्थोपस्थित्या श्रोतुर्वैमुख्यं दूषकताबीजं। शमकथादौ न दोषस्तात्पर्यबोधकत्वात्। भगिनी
शिवलिंगप्रलीडादिपदे च पिन तथा असभ्योपस्थित्यभावात्। अत एवानित्यदोषत्वं संदिग्धमिति। अ
भिधारितार्थकमित्यर्थः। तत्र पदसंदेहे तदर्थसंदेहे वेत्यन्यदेतत्। वध्यामिति। द्वितीयातत्त्वेन नमस्यामिति सभ्य
शाम्यं तत्त्वे हठाद्धृतमहिलायामिति रूपाधिकरणनिर्देशः। दूषकताबीजमुद्देश्यनिश्चयाभावः। यत्र संदेह
एवोद्देश्यो यत्र वा प्रकरणादिना विशेषनिश्चयस्तत्रादोषत्वमत एवानित्यदोषोयं। केवले शास्त्र इति॥
।नन्नौ न्यार्थकत्वेन शब्दानुशासनातिरिक्तशास्त्रमात्रप्रसिद्धमित्यर्थः। अत एवाप्रयुक्ताद्भेदः। तस्यान्यत्रापि
प्रसिद्धत्वात्। सम्यग्ज्ञानेति। आशयो मिथ्याज्ञानजनितसंस्कारः। योगजमदृष्टं वा। अत्रेति। एवं शास्त्रान्तरे
र्थ प्यूहर्षं। दूषकताबीजं तच्छास्त्रानभिज्ञस्यार्थानुपस्थितिः। अत एव तदभिज्ञं प्रत्यदोषत्वमित्यनित्यदूषणं।
केवले लोक इति। सकललोकप्रसिद्धं। वास्मिन्देशे सर्वलोके यदास्यव्यथा तद्दस्त्वप्रयुक्तमित्यर्थः। यत्तु लोका
मात्रप्रसिद्धत्वमुक्तार्थः। अत एवाप्रसिद्धभेदः तस्य शास्त्रप्रसिद्धत्वादिति। तत्र उदाहृते कटिशब्दे स्वादनपाना
दिशब्दे वोदाहरणीये तदभावात्। न चाश्लीलसंकरस्तस्य व्रीडादिव्यंजकत्वेन तथात्वात्। ग्राम्यत्वस्य स्वल
एकोपाधित्वात्। शकेति। शाकाहरणचिंदापूर्तिभिः। दूषकताबीजं तादृशशब्दप्रयोगे श्रोतुर्वैमुख्यं। न चाश्लील
त्वं। तस्य ग्राम्यत्वाप्रयोजकत्वात्। स्वादनपानादिशब्दे तदभावात्। विदूषकादिको न दोषः। तत्र वैमुख्याभावा
ल्। अत एवानित्यदोषत्वं। शरत्कालेति। मुखं कर्दे। अत्र चपेटेनेति। चपेटापातनकरणार्थकं निर्जितत्वं लक्ष्यते अ
तिथिपदे नेति शेषः। अन्यथा केवलं चपेटपदस्य लाक्षणिकत्वेनान्वयात्। न च लक्षणा चपेटपदे व्यन्यथाप्यसंभ
वात्। चपेटपतनस्य बाधात्। समासे द्वयादिशब्दलोपे नवान्वयात्। यच्च विचपेटिं दस्यालंतं धिछायत्वादिसु दि
टमेवभासते तथाप्यतद्गुणो नातिथिपदे न तथा नेति तदुक्त हरणं द्रष्टव्यं। चपेटेत्यादिसमस्तमेव पदं निर्जितत्वलचे
र्क। नन्वत्र मुख्यार्थबाधार्थातिरेकी कश्चिदर्थो योगरूपतद्वृत्ति निर्धारः। वाक्य एव लक्षणेति केचित्। दूषकता।
वीजं तत्प्रभावेनार्थोपस्थापकं। नच विज्ञायत्वातिशापद्यथा। उत्तमं प्रत्ययधर्मेण क्लृप्ते तदभावात्। प्रत्ययताय
...सावगमात्। अत एव नित्यदूषणमिदं॥

अत्रमिथ्येति। मिथ्यार्थस्याप्राप्तत्वात्तत्प्राप्तो निष्फलत्वस्योचितत्वेन किमेतदित्याशंक्य संगतेः।६

यतोऽर्थप्रतीतिरिति। विलंबश्चानासन्नत्वेन सामान्यरूपकपदार्थस्याकरणाद्यभावे झटिति विशेषानुपस्थितेर्वैत्यन्य
देतत्। अतएवानित्यदोषत्वं। अत्रिलोचनेति। सामान्यतोऽन्वयबोधाविलंबेपि चंद्रत्वादिनाझटितिनोपस्थिति
रन्यथापितथात्वात्। दूषकताबीजं च प्रतीतिविलंबः। यमकादावदोषः। प्रतीतविलंबस्यानुद्देश्यत्वात्। अत
एवानित्यदोषत्वं। अविमृष्ट इति। प्राधान्यं विधिप्रतीतियोग्यता साचानुपसर्जनीभूतत्वे सत्युद्देश्यानंतर्यं।
अतोऽन्यकारो ह्ययमित्यादौ नातिव्याप्तिः प्राधान्याभावात्। क्वचिद्विधेयस्यानुपस्थापनात्। मूर्ध्नीमिति।उद्द
तमुद्धृतप्रायं यत्कर्तनमुत्तरोत्तरमुत्पाद्यत्वं तत्कर्तनं तेन पातनाधिक्यानुभवात्। स्वस्तामिति। केसरो वकुलः।
न्यासः समर्पितं द्रव्यं। मौर्वी द्वितीयामिति विधिस्वरूपकथनं। यथाश्रुते द्वितीयत्वस्य समासे गुणीभावात्।
पदैकदेशेऽपि विधेयभावासंभवाच्च। वज्रीणवेवत द्वितीयत्वगुणीभूतस्यान्यपदार्थे गुणीभावे सत्युदाहर
किं ति। वपुरिति। यत्त्रिलोचनेस्थितमस्त्रमपि वैरेषु किंमित्यतद्वदन्वयः। यथाश्रुतान्वये रूपादेस्तुल्यत्वयोपन्या
सकसंगादितिनिर्धारः। वस्तुतो यथाश्रुतमेवसम्यक्। यत्तद्द्वयमध्याहारेण वपुरिसाधेन्वयात्। द्वयं किंवाख्या
नेनिवेदितं वक्षित्वादेरनन्वयादिनासते द्वेलवधेयं। अजन्हितेति। यद्यपिवौवपियनिर्वचनमप्राधान्यमेवमा
पितथापि समासनिर्वचनं तन्निवर्ततेइतिभावः। नञ्समासेउदाहरति। आनंदेति। विरुद्धप्रतिनायिकासखी
नाम्नुक्तिः। निषेधो विधेय इति। असमासएवनञोऽभाववाचकत्वात्। तथाचनमुकेतिविवादितं। अभानवि
धौ दृष्टांतो यथेति। मेघादौ निशाचरादिभ्रमानंतरं पुरूरवसद्युक्तिः। इत्थं वल्लभात्। सुरयन्तुरिंधपत्तुः। निक
षः स्वरविशेषः। उर्वशी प्रियामप्रीतिसंबंधः। नन्वत्रपत्निवादेन क्रियांतरविधौ दृष्टांतमाह ज्ञुगोपेति। नञ्समासेन
नञोऽभावार्थत्वमितिभावः। विरुद्धेति। मन्तव्यप्रतीतिन्यकारकप्रतीतिजनकमित्यर्थः। सुधाकरेति। सुधाकरकरा
कारं विशारदमुज्ज्वलं श्रेयं पावे हितं यस्य। अकार्यमित्रशास्त्रकार्यं। समासेऽर्थांतरनिरूढत्वेन तदुदाहरति। चिर
कालेति। चिरकालपरिपालिताया जीवनानंददायिनइत्यर्थः। अत्रेति। गजच्छयस्य रूढत्वेन रोगविशेषोपस्था
पकत्वादितिभावः। न चस्तमिति [illegible] तदयासमूहः। धनुर्ग्राहिजताभंजयतेसर्थः। तार

।को सुरविरोधः। अत्रेति। अन्यथाभवादित्येवामिदध्यादिति भावः। नानार्थत्वेन तदुदाहरति गोरपीति। यद्वा
हन तात्प्राप्तयतो गोरपि सविधे सोविभ्रसि दोगिरि सुतासिंहः निरहंकारद्रसन्वयः। अंबिकाऽतुर्ण तस्याः प्रकृति
त्वेन जगन्मातृत्वात्तत्स्यारमतो महेशः। अत्रेति। अंबिकामाता तस्यारमण इति विरुद्धमतिरित्यर्थः। नवाभ
वन्मतयोगसंकरः। तत्राभिमतवचावोधोत्राहं नाभिमतवोधः उक्ताशित विरुद्धस्यापि दोषत्वात्। हूनकता
13 वीजं विवक्षितार्थतिरस्कारकार्थोपस्थितिर्निमित्तं वपामेतत्। किंत्वादिषु समासनियमात् श्रुतिकटु। दि
षुनियमः तत्र क्रमेणोदाहरति समासगतं यथेति। सुधासांद्रतरंगपुके लोचने यस्याः सा तथेत्यर्थः। वक्रोहरि
मदूरः निकृष्टैर्नवास्तु। अन्यदपीति। च्युतसंस्कृत्यादिकमपीत्यर्थः। तत्काव्यपददोषान्यदेकदेशेति दिशति। अ
पास्येति। च्युतसंस्कारमित्यादिभावप्रधानो निर्देशः। एतेश्रुतिकटुत्वादयः। ननु च्युतपददोषत्वं च्युतदेक
देशदोषत्वमत्र किं विनिगमकं। न च सर्वेषामेव वर्णानां श्रुतिकटुत्वे पददोषत्वं तथा सति सोध्यैष्टेत्यादेःपद
दोषासंभवे वाक्यदोषत्वं न स्यात्। नानापददुष्टत्वाभावादिति चेद्। यत्र पदांतरसाहित्येन पदानां दोषत्वं स
वाक्यदोषः। न चासाधसमर्थादीनां तदिति तन्निरसननितिप्रांचः। तन्न। सोध्यैष्टेत्यादिवाक्यदोषोदाहरणे
सर्वथैव गत्यभावात्। किं वा वाचकमसमर्थस्तिमानशीलं किमिति नापास्तमिति। उच्यते। विवक्षितधर्मोपस्था
पकशब्दसंबंधित्वे सति नानापदसंबंधिदोषत्वं वाक्यदोषत्वमभिमतं तस्य तदेकदेशदुष्टत्वेपि सत्वात्। ननु
पददुष्टत्वं न बीजं गौरवात्। न्यक्कारो ह्ययमित्यत्र एकदेशरूपविधेयवाचकयोर्द्वयोरपि दुष्टत्वे नाविकलत्वात्
।असमर्थादीन तथा। धर्मितोनुपस्थापनात्। निरर्थकेविचत्तौ विरहादिसलनं विस्तरः। वयं तु नानापददोष
त्वे वाक्यदोषत्वं एकपदतद्दुष्टत्वे पदैकदेशदोषत्वं नानाभावतद्दुष्टत्वे पददोषत्वं। सोध्यैष्टेत्यादौ वहुपदेषु
नानाच तद्दुष्टत्वसत्वात्। पददोषत्वं। ततश्च वाक्यदोषत्वं बाधकाभावात्। वस्तुतो नानापदहतित्वेन यत्र विद
।हितार्थप्रतीतिदुष्टत्ववीजस्यापि [illegible] तस्यैव वाक्यदोषत्वे। कष्टत्वादीनामेकदेशकत्वादिसंभवात्। नचासा

धुत्वादौ तथा। नानापदासाधुत्वे न दोषाधिक्याभावात्। निरर्थके विवक्षितार्थत्वाभावात्। अवाचकेपि कश्चिद्ध
र्मिताः कश्चिद्धर्मधर्मिणोरुभयोरपी सातिशयसंभवात्। अत्र ये काकपद इति त्वेनानुसंधीयमानाश्चमत्कारविशे
षि नूत्तिवामेवका क्व दोषत्वं न यावाच्यकादयस्त्वर्थोदिति केचित्। उदाहरति सोधेष्वेति। अपारीतृपङ् तर्पणा
धातुः। तानुददत्तु। रा दाने धातुः। पात्विति कविपाठः। अनेडमूकतां चैरिति खंडने करतात्वं। अनेडमूकताः
न एडमूकोयस्मादित्यथात्। कुविंद इति। गुणग्रामं स्त्रौयदि सहृहं। पट्यसि पटूकरोषि। अभितः सर्वतः
आरोहपरिणाहाभ्यां। अयपत्राश्चे लकारप्रश्लेषः। गोरंध्येतं। सितो गौर इति कोशात्। विकटं सुंदरं। विक
टः सुंदरे प्रोक्त इति विश्वः। पिगताछादनमपतिरोधं वियद्वंच। अर्थांतरमुकरूपं। उपश्लोक्यमानः स्तूयमानः।
अत्रप्राप्नेति। प्रगतजलद्वत्वविप्लुपद्त्वसह्राश्वत्वे संकोचत्वपमत्वादिनारूपेतो नित्रोषः। पभागान्निमित्त
पत्राणामित्यपपाठः। अश्लीलेवुधीडाव्यंजकमुदाहरति नृपतेरिति। उपसर्पतामभिमुखगमनं रिरंसाया।
मोहनं चेतनाभूत्यत्वं निधुवनं वा। कंपनादिपदानां व्रीडाव्यंजकत्वं नास्तीत्याह अत्रेति। उपलक्षितापरंव
दितिकेचित्। तत्रैरिति। वीतं छर्दितमुपेक्षितं वा। उत्सनोमितः रोपश्चः। सुरतान्तयोर्ना। पर्यचित्तासमृद्धा। परिस
र्दतो भावेनाद्या समृद्धं वा। तस्याधीति। यो मितस्ता वात्रिविधाः मृदूपायो मध्योपायोधिमात्रोपायश्च। ते च प्रत्येकं
मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्चेति त्रिधा। एवं नवभेदा भवंति। तेष्वधिमात्रोपायस्तीव्रसंवेगः सिद्ध
कथ्यते। हठेति। चिरकालनिरंतराभ्यासो हठभूमिः। तत्प्रियस्तदेकप्रिय इति यत्नविशेषणमिति केचित्। च
स्ततस्क हठभूमिरिति पाठः। हठसंस्कार इत्यर्थः। प्रियपश्चाद्भोगो चालाभे सतीत्यर्थः। यद्वा हठभूमिरिति सम
तांप्रियविरोधणाभेव तत्व्याप्ताविलर्थ इति तत्त्व। अपूर्वेति। अपूर्वावांचे फससतिः कौशलं वयसर्थः। अत्रा
यमिति। अनुवाद्यमनुक्त्वैव नाभिधेयमुदीरयेदिति स्वरसात्। अत एवन्यायवाक्योपि पर्वतो वह्निमानित्येव नि
पवेन तु चैपरीसं। अन्यथा वैपरीत्येन प्रतीतिप्रसंगादिति भाष्य।। अयं न्यकार इति क्वचोरपि पदयोरुपलक्षणत्वाद्या
क्वदोषत्वं न तु इत्थो कुत्सितत्वं तंत्रवाच्यं किमभिरि

पनेन वृथात्वस्यैव विधेयत्वात्। अपसिद्धेऽपि वा अभिधानवैफल्याद्। वृथोक्तत्वं तथैवोचितार्थिता
हृदुक्तत्वमात्रमिति। यद्यपि वाक्यदूषणताप्रस्तावे समासदूषणमप्रस्तुतं तथापि प्रसंगेन कथनमेतद्। य
स्तु नो वाक्यदूषणमेव वृथोक्तैः किमेभिर्भुजैरित्यत्र किमिति वृथात्वमेव विधेयं। न च तथा प्रतीतिः वृथा
त्वस्यानुदितत्वात्। अनुद्देश्यविधेयत्वायोगाद्। न च पौनरुक्त्यं उपधेयसंकरे एकपाधेरसंकराद्। यस्तु वः
१५ किमित्यनेन भुजानामेव वृथात्वविधानात्। अनुवादस्योक्तत्वात्तत्वेनेति विषयभेदादिति नव्यं। ननु न्यू
धारो यमिसत्रवेपरीमेन प्रसयादर्थदोषत्वं भवेदत आह अत्रत्याक्षरवनेति। एवं वरचनायाः शब्दधर्मत्वे
न शब्दधर्मत्वं। अर्थदोषत्वेप्रकारांतरेणाप्यभिधानेदुष्टत्वप्रसंगादिति भावः। कविद्विधेयत्वानुपस्थि
त्यापि तद्दोषत्वं तदुदाहरति अपांगेति। विच्छित्तिं गतिविशेषः। अत्रयोसाविति। यच्छब्दस्यार्थपरामर्श क
त्वात्तद्दोषत्वं तदुदाहरति अपांगेति। विच्छित्तिं गतिविशेषः। अत्र यो साविति। यच्छब्दसांनिध्येनादसादीनां प्रसिद्धिपरामर्शकत्वादिति भावः।
छब्दसापेक्षत्वादिति भावः। अनुवाचेति। यच्छब्दसांनिध्येनादसादीनां प्रसिद्धिपरामर्शकत्वादिति भावः।
ननु यत्तदोः सापेक्षत्वमेवासिद्धं एकैकप्रयोगदर्शनादिति चेन्न। यत्तदोर्नित्याभिसंबंधात्। सच क्वचिच्छाब्दः
क्वचिच्चार्थ इति विशेषः। अनुपात्तस्यापि सामर्थ्याद्देवलाभात्। तदेवाह तथाहीति। प्रक्रांतार्थमुदाहरतिका
तर्यमिति। केवलेति लिंगव्यत्ययेन स्रोतेऽपि योजनीयं। अन्विचेच अनिष्टवादृश्यमिति। द्वितीयश्चकारो
भिन्नक्रमः त्वं चेत्यर्थः। उत्कंपिनीति। विधुरवैरिणी। क्रूरतादहनेन सहसैव दग्धानुवीचितासीति संबंधः। क्रू
रेणासमत्सरेण। स्वभावादेव दारुणात्वं मत्सरेणावाधिक्यं। धूमांधितेनेत्यनवलोकनेहेतुः। यथा साधितेति। पुष्क
रेः पद्मैः साधु कृतं अभिरामतांधिकेचंद्रमसि यन्मीलितानेनेति। चंद्रमसेत्यर्थः। प्राप्तं पात्रमिति। पूर्वयाक्योपात्तइ
त्यर्थः। इदमपीति। यच्छब्दतच्छब्दानुभावेऽपि सामर्थ्यादाक्षेपादेव क्वचिदवगम्यत इत्यर्थः। ननु पूर्ववाक्यगतोऽपि त
दाक्षेपसमर्थोऽधिपातयत्यर्थोदिदाहरितं उपवलयेदित्यादावितिवेत्तानायदित्राइदं छब्दादौ क्वचलत्विचे विज्यात्।
तस्यामयत्वेनयच्छब्दत्वाभावात्। किमपीति। काका किमपि न जानेत्यर्थः। यद्वा किमप्यत्यामिसर्पः। उपलक्षते
स्तितं प्रतियत्न इत्यर्थः। तत्र कमेलाया न माहकालइति। अत्र द्वयोः प्रतीतौ विलंवाभावादाक्षेपाद्युपस्थितिखी

कारात्। अनाश्रयेपि पूर्वापरार्धयोः संबंधो न स्यादिति भावः। यत्तु पद्मं दृश्यानपेक्षमेव प्रसिद्धार्थं धयेतच्छब्दबोधकल
मिति व्याख्यानं तत्तुच्छं। नित्याभिसंबंधविरोधात्। अत एवोक्तमुपादानं नापेक्षत इति न तु यच्छब्दमिति।
एवं चेति। यो सावित्यर्थः। दाहरतादित्यर्थः। नन्वसावित्येतच्छब्दार्थबोधकमत आह नवासावित्यति। तत्र हेतुमा
ह असावितिमंडलं दिवंशार्द्धवत्। ताराधिपएवमंडलात्मप्रतीयन्ते। ताराधिपस्य सुभ्रीयस्य मंडले रात्रेकुत्रत्वा
दित्यर्थः। अनुभवविरोधमाशंक्याह प्रतीतो चेति। विजयस्यार्जुनेयकोऽद्वितीयो महत्वः। अर्जुनेति पाठे
तदुत्योमहत्वइत्यर्थः। क्वतमिति। कृतं पुरुकस्यादित्यर्थः। कथं न तत्रेत्यत आह यच्छब्दस्यानिकटइति। यच्छ वि
इत्यत्र यथायच्छब्दइति संबंधः। तच्छब्दोपलक्षणसंनिधिस्थ इत्यर्थः। एवं चादसादीनामव्ययं तथात्वमिति
भावः। नन्वेवं श्रुतो ति तस्मादपि यः सपापभागित्यादावपि तथास्यादिति चेत्। नायदूसत्रबिच्छेदनव्य
वधानात्। दोसावि सत्रसंधिनाप्यत्र सन्निकृष्टेकदेशात्वेनापि छेदात्। नन्वेवं यः कश्चिदस्ति तमानयेत्या
दावपि प्रसिद्धार्थत्वं न स्यात् तत्रसंधोयतौ पितुः यः सपापेत्यादावपि तुल्यत्वात्। किं बहुना येनेतेनेत्याद
यपि तत्त्वं न स्यात् दितिचेत्। न। क्रियाभिसंबंधेनतदेकदेशानतुप्रविष्टं यत्तदर्थो विस्थितो यत्र क्रियां
१५ तरसंबंधप्रतीति स्तत्रतस्यौ यो विधेयत्वेनान्वेतिश्रुतो वितस्मादपीति वत्। अन्यत्रप्रसिद्धार्थत्वं यः कु
श्चिदित्यादिवत्। तुनाति यो सावित्यादौ तत्र थान घटते एकदेशानुप्रवेशानैकपदत्वाद्यगमात्। येनतेने
त्यादौ न तथा। क्रियाभेदाभावात्। गतं येनतेनमुज्यत इत्यादावविक्षत्वात्। किमश्रयूयगेवक्तव्यन्तिः। गतं येन
केनचित्यतीतेन नभिसंबंधादित्यलं विस्तरः॥ यत्तदोर्नित्याभिसंबंधो नास्तीत्याशंक्य। नन्विति। कत्याणानां
शुभहेतूनां महसां तेजसां भाजनमाश्रयः। विश्वस्मिन् मूर्तिर्यस्य। स विश्वमूर्तिः। जगन्नाथेति। तेनममा
वि नाथः। नमस्याप्रता तस्य। तेनझटातन्द्रत्यश्रसाद्वचितइति भावः। मदभक्तदचितो विवं। मंगलायवितरेति
संबंधः। येन केनचिदिति। तथा च यत्तदार्थस्तत देनपराम्रष्टम्य तदुत्येवनियमोनङ्ते नैवरूपेण मानाभावादेवं

यत्तदाभ्यां रूपभेदेनोपस्थितं पापमेकेनैव तत्पदेनानुगतरूपेणापरामृष्टवत् इति भावः। यत्तु यथा दिते
कामेयपदं नित्यवीप्सयोरिसनेन पदद्वयात्तत्कसमुदायादेशादेवं न रूपभेदेनोपस्थितिरिति। तन्नासमु
दायत्राकोभानाभावात्। वीप्सायाः साकल्यसंबंधबोधपरत्वादाद्रेशिना एकपदेनैव सकलोपस्थिति
संभवात्। नयैवं तत्र द्वएव वीप्सा स्कृता यत्ताविसाकल्यसंबंधबोधपरत्वाचगमादितियाम्। यत्तदस्य
प्रपभापस्थितत्वेन तत्रैव औचित्यात्। अत एव कवितत्पदप्रयोगम्य तत्रैव वीप्सा। तत्र कर्मकृतं पदे यह
15 निभिन्नौ हेतोः फलैर्वीचितमिसाद्दौ। यदि तूभयत्र वीप्सा तदा रूपभेदेनोपस्थितावपि न विरुद्धं। अथ स
मासेप्यनेकपदगतत्वेन वाक्यदोषमुदाहरति किं लोभेनेति। मात्वा मात्वक्षरा येनैतदेवं कृतमिसन्धयः।
मासेप्यनेकपदगतत्वेन वाक्यदोषमुदाहरति किं लोभेनेति। मात्वा। मात्वक्षरा येनैतदेवं कृतमिसन्धयः।
एतत्रासस्य वर्गेनगमर्ना। एवं कपटेना। मध्यमा माताकैकेयी। इत्यनुचितमिसत्रैतिशब्दोहि तौ। अत्रार्थस्ये
ति। संबंधस्योत्कर्षहेतुत्वेन विधित्सितस्य प्राधान्यौचित्यादितिभावः। ननु समासासमासयोरर्थभेदा
भेदाभावात्कथमेव मिति चेत्। न। अर्थभेदाभावे विसमासनिर्बंधनगुणीभावावस्थकत्वात्। तदेतदुक्तं तो नतु
थ्यामहिमत्वेन सभावात्। किं यभिन्नपदोपस्थितस्यैव विधेयत्वमित्येकत्वात्। तदेतदुक्तं ततो नतु
समासे गुणीभाव इति। यस्कृतः षष्ठीसमासे पूर्वपदे संबंधिजन्यता प्रातिपदिकयोरभेदान्वयस्य कर्म
णि सिद्धत्वात्। एवं च विशेषणतासंबंधस्य गुणीभूतत्वम् समासे तु नन्वेति तत्त्वं। यथो न्यूनेत्यादि इत्यौ।
चित्र दत्तुजआर्यसंबंधं विधाया नौ विसकारित्वाभावो विधेयः। यत्रार्थसंबंधस्तत्रानौचित्यायोगात्। एवं
। यं विहितविधेयत्वं विवक्षितं न च तथा प्रतीयते संबंधगुणीभावात्। विरुद्धमतिकृदुदाहरति श्रितसमाद्
ति। सौ निर्मितः पत्रो भूमिपतिताः। रक्तच्छयः अनुरक्तमुखः। पदेस्वधिरस्थानानि। श्रीवालिंगितम् तयैः कुर
तेना लिंगिताः। पत्रेषु चिवाभिराल्लिंगिताः। विग्रहद्वेपतोनदेल्लवंडनेन। पदेषु दुर्विगमेन। गताः सुखाः गत
दुःखाः। पत्रेगतश्रातां दियादृत्यर्थः। पदैकदेशे श्रुतिकटुत्वमुदाहरति अलमिति। अतिपपलत्वादिहैौ
तत्तवौंगनासंगमे योजनीयाः। मैनादिस्वाम

येतदपसरत्वार्थं कंचिच्छरीरमार्पितवं वंजिनं प्रति कस्यचिदभिधानमेतत्। जिनानां दयाशीलत्वात्। अ
त्र दया वीरस्यानुभावविशेषे शृंगारजपमानभावे नांगं। न च दयापि विस्मयोपकारकत्वेनांगमेवेति वाच्यं।
बौद्धानां स्वाभाविकदयावत्त्वेन विस्मयाहेतुत्वात्। अंगिनि विरुद्धयोरंगत्वं द्विधा तुल्यत्वेनैतयोः परस्परांग क
भावमापद्यवा तत्राद्यमुदाहरति कार्मल्यमिति। स्थलीरिति क्रमपदे। हतको मत्के स्यादिपादविशेषणंसद
र्भत्वं तद्वास्तवत्वेन तद्वत्वेन च। धूमेन भयेन च वाष्पपतनात् उघद्विवाहाद्ये वेति। तत्काले पिमर्दकरावलं
बनादिसंभवात्। अग्निमिति परितः शत्रूणां गेहदीप्ते यत्र वधू सा। अत्र राजविषयरतिभावे करुणशृंगा
रावुभावपि साक्षाद्दंगमिति तन्निर्वाहकत्वाकुलयोरिकराजकार्पोघतयोरिवभट्टयोः संकटचिराधीनदोषा
येत्वर्थः। तदेव दृष्टान्तेनोपपादयति। एहीति। एवं च विधेययोरेव विरोधो न त्वर्थलभ्ययोरिति भावः।
प्रकृते चमुनरपक्षघद्विवाहाद्ये त्पक्षे सा तेन इदं वीर्यप्रतापोयेन पुनर्विवाहव्यक्षेदपतद्विपर्ययवसा
नात्पतापे द्वयोरपि साक्षादेवांगत्वं। द्वितीयभेदमुदाहरति क्षिपइति। हस्तावलग्नो ग्रुकांतमादहानोपि ह
तद्दृष्टान्चयः। अवधूतो निराकृतः। नन्वेवमपि शृंगारेणापरिपुष्टे करुणो प्रधानमेव न तु प्रभावातिशयं गमत
आह तथापीति। शृंगारापेक्षया प्रधानत्वेपि प्रभावातिशयगत्वमेवेति भावः। अथ वेति। मुख्यो र्थः प्रभा
वातिशयरूपः। उपोद्वल्यते प्रकर्षमिव याप्यते। एवं शृंगारस्यापि प्रभावातिशये गत्वमेव चमत्कारप्रयोज
कत्वात्। नवांगांगस्य कथमंगत्वमिति वाच्यं। तदुपकृतस्योपकारविशेषप्रयोजकत्वादिति भावः। प्रथममपक्षे
एकस्य द्वयं परपक्षे विशिष्टये। शिष्टमिति पक्षयोर्भेदः। अन्यथांगत्वाविरोधेणाभेदासंभवात्। तदेवाह ग्रंथे
हीति। ननु रसस्य न विरोधो न चांगत्वमत आह प्रतिपादितेति॥ ॥इति श्रीमहामहोपाध्यायतर्कतर्कपंचान
नश्रीदेवनाथकृते काव्यप्रकाशविवरणे कौमुद्यां सप्तमोल्लासः॥ ॥श्रीरस्तु॥ ॥श्रीभवानीजयति॥ ॥

काव्यप्रकाशविवरणं देवनाथकृतं कौमुद्याभिधं

पत्रे ८

१।